उषणं, क्ली, (उष्+बाहुलकात् क्युन्। ल्युट् वा।) मरिचम्। इत्यमरः। पिप्पलीमूलम्। इति राजनिर्घण्टः॥

उषणा, स्त्री, (उषण+टाप्।) पिप्पली। इत्यमरः॥ शुण्ठी। इति राजनिर्घण्टः॥ चविकम्। इति रत्नमाला॥ ("उपकुल्योषणा शौण्डी" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे पर्य्याय उक्तः।)

उषती, स्त्री, (उष्+शतृ। आगमशासनस्यानित्यत्वात् नुमभावः।) अकल्याणवाक्। इत्यमरः॥ (यथा, महाभारते १।८७।८।

"ययास्य वाचा पर उद्विजेत
न तां वदेदुषतीं पापलोक्याम्"॥)

उषपः, पुं, (ओषतीति। उष्+"उषिकुटिदलिकचिखजिभ्यः कपन्"। ३।१४२। इति कपन्।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥

उषर्बुधः, पुं, (उषसि प्रातर्बुध्यते प्रकाशते। उषस्+बुध्+क।) अग्निः। इत्यमरः॥ रक्तचित्रकः। रांचिता इति भाषा॥

उषसी, स्त्री, (उषं दिवसं स्यति दूरीकरोतीति। उष+सो+क+ङीप्।) सन्ध्याकालः। इति मेदिनी॥

उषा, स्त्री, (उष+क+टाप्।) बाणराजसुता। सा तु अनिरुद्धभार्य्या। (यथा, हरिवंशे १७४। बाणयुद्धे १२।

"बाणस्य दुहिता कन्या तत्रोषा नाम भाविनी"। इति विस्तृतिस्तु बाणयुद्धशब्दे द्रष्टव्या।) रात्रिः। इति मेदिनी॥ स्त्रीगवी। इति हेमचन्द्रः॥ उखा। स्थालीति यावत्। इत्यमरटीकायां रमानाथः॥ (रात्रिशेषः। यथा ज्योतिषे।

"उषां गोधूलियोगं वा स्वीकृत्य गमनं चरेत्"॥)

उषा, व्य, (ओषतीति। उष+क+टाप्।) रात्रिशेषः। रात्र्यवसानम्। इत्यमरमेदिन्यौ॥ सा तु नक्षत्रतेजःपरिहानिमारभ्य भानोरर्द्धोदयं यावत् भवति। यथा,—

"अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्"॥ इति तिथितत्त्वे वराहवचनम्॥

उषाकलः, पुं, (उषायां कलो यस्य।) कुक्कुटः। इति त्रिकाण्डशेषः॥

उषापतिः, पुं, (उषायाः पतिः।) अनिरुद्धः। स तु कामदेवपुत्रः। इत्यमरः॥ (एतत्कथा बाणयुद्धशब्दे द्रष्टव्या।)

उषारमणः, पुं, (उषाया रमणः।) अनिरुद्धः। इति हलायुधः॥

उषितः, त्रि, (उष वा वस+क्त।) व्युषितः। दग्धः। इति मेदिनी॥ त्वरितम्। इति धरणिः॥ स्थितः। इति त्रिकाण्डशेषः॥

उषितङ्गवीनः, त्रि, (उषिताः स्थिता गावो यत्र।) आशितङ्गवीनः। यत्र पुरा गावो भोजिताः। इत्यमरटीकायां रमानाथः॥

उषीरः, पुं क्ली, (उष्+कीरच्।) उशीरः। वीरणमूलम्। इत्यमरटीकायां रायमुकुटः॥

उषेशः, पुं, (उषायाः बाणकन्यायाः ईशः।) अनिरुद्धः। इति हेमचन्द्रः॥

उष्ट्रः, पुं, (उष+"उषिखनिभ्यां कित्"। ४।१६१। इत्युणादिसूत्रेण ष्ट्रन् किच्च।) वाह्यरथः। इति धरणी॥ पशुविशेषः। उट् इति भाषा। तत्पर्य्यायः। क्रमेलकः २ मयः ३ महाङ्गः ४। इत्यमरः॥ दीर्घगतिः ५ बली ६ करभः ७ दासेरकः ८ धूसरः ९ लम्बोष्ठः १० रवणः ११ महाजङ्घः १२ जवी १३ जाङ्घिकः १४ दीर्घः १५ प्रचङ्कलकः १६ महान् १७ महाग्रीवः १८ महानादः १९ महाध्वगः २० महापृष्ठः २१ बलिष्ठः २२। इति राजनिर्घण्टः॥ दीर्घजङ्घः २३ ग्रीवी २४ धूम्रकः २५ शरभः २६। इति जटाधरः॥ क्रमेलः २७ कण्टकाशनः २८ भोलिः २९ बड्डकरः ३० अध्वगः ३१ मरुद्विपः ३२ वक्रग्रीवः ३३। इति शब्दरत्नावली॥ वासन्तः ३४ कुलनाशः ३५। इति त्रिकाण्डशेषः॥ कुशनामा ३६ मरुप्रियः ३७ द्विककुत् ३८ दुर्गलङ्घनः ३९ भूतघ्नः ४० दासेरः ४१ दीर्घग्रीवः ४२ केलिकीर्णः ४३। इति हेमचन्द्रः॥ (यथा मनुः ४।१२०।

"नाधीयिताश्वमारूढ़ो न रथं न च हस्तिनम्।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः"॥
"उष्ट्रयानं समारुह्य खरयानं तु कामतः"।

इति च मनुः। ११। २९॥)

उष्ट्रकाण्डी, स्त्री, (उष्ट्र इव काण्डोऽस्य। जातित्वात् ङीष्।) पुष्पजातिभेदः। उँटाटी इति ख्याता। तत्पर्य्यायः। रक्तपुष्पी २ करभकाण्डिका ३ रक्ता ४ लोहितपुष्पी ५ कर्णपुष्पी ६। अस्या गुणाः। तिक्तत्वम्। उष्णत्वम्। रुचिकारित्वम्। हृद्रोगहारित्वञ्च। अस्या वीजगुणाः। मधुरत्वम्। शीतत्वम्। ग्रीष्मत्वम्। वृष्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥

उष्ट्रधूसरपुच्छिका, स्त्री, (उष्ट्रस्य धूसरः पुच्छइव पुच्छो मञ्जरी यस्याः।) वृक्षविशेषः। इति रत्नमाला॥ विचिटीइति भाषा॥

उष्ट्रपादिका स्त्री, (उष्ट्रस्य पाद इव पादो यस्याः।) वृक्षविशेषः। मदनमालीति ख्याता। तत्पर्य्यायः। शातभीरुः २ भद्रवल्ली ३ भूमिमत्ता ४। इति रत्नमाला॥

उष्ट्रशिरोधरं, क्ली, (उष्ट्रस्य शिरोधरः ग्रीवा इव आकृतिर्यस्य।) भगन्दररोगविशेषः। तस्य लक्षणम्।

"प्रकोपनैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़काङ्गुदागताम्।
तदाशुपाका हिमपूतवाहिनी
भगन्दरन्तूष्ट्रशिरोधरं वदेत्"॥

इति निदानम्। (अस्य लक्षणं चिकित्साञ्चोक्तवान् वाभटे उत्तरस्थाने २८ अध्याये। अस्य नामान्तरमुष्ट्रग्रीवः। यथा।

"पित्तादुष्ट्रग्रीवावदुच्छ्रिता॥
रागिणी तनुरुष्णाढ्या ज्वरधूमायनान्विता"।
"उष्ट्रग्रीवस्तु पित्तजः"।
"अग्निना वा भिषक् साधुक्षारेणैवोष्ट्रकन्धरम्"।

सुश्रुतेन निदानस्थाने ४ अध्याये यत् सम्प्राप्तिपूर्ब्बकं लक्षणमस्योक्तं तद्यथा॥ पित्तन्तु प्रकुपितमनिलेनाधः प्रेरितं पूर्ब्बवदवस्थितं रक्तां तन्वीमुच्छ्रितामुष्ट्रग्रीवाकारां पिड़कां जनयति। सास्य चोषादीन् वेदनाविशेषान् जनयत्यप्रतिक्रियमाणा च पाकमुपैति व्रणश्चाग्निक्षाराभ्यामिव दह्यते दुर्गन्धमुष्णमास्रावं स्रवत्युपेक्षितश्च वातमूत्रपुरीष-रेतांसि विसृजति तं भगन्दरमुष्ट्रग्रीवमित्याचक्षते"॥ इति।*॥ सुश्रुते चिकित्सितस्थाने ८ अध्याये चिकित्सा यथा,—

"उष्ट्रग्रीवे क्रियां शृणु।
अथोष्ट्रग्रीवमेषित्वा छित्त्वा क्षारं निपातयेत्।
पूतिमांसव्यपोहार्थमग्निरत्र न पूजितः।
अथैनं घृतसंसृष्टैस्तिलैः पिष्टैः प्रलेपयेत्॥
बन्धं ततोऽनुकुर्व्वीत परिषेकन्तु सर्पिषा।
तृतीये दिवसे मुक्त्वा यथास्वं शोधयेद्भिषक्॥
ततः शुद्धं विदित्वा च रोपयेत्तु यथाक्रमं।
उत्कृत्यास्रावमार्गन्तु परिस्राविणि बुद्धिमान्॥
क्षारेण वा स्रावगतिं दहेद्धुतवहेन वा।
सुखोष्णेनाणुतैलेन सेचयेद्गुदमण्डलम्॥
उपनाहाः प्रदेहाश्च मूत्रक्षारसमन्विताः।
वामनीयौषधैः कार्य्याः परिषेकाश्च मात्रया"॥)

उष्ट्रिका, स्त्री, (उष्ट्रस्याकृतिरिवावयवो यस्याः। उष्ट्रस्य स्त्री वा॥) मृत्तिकाभाण्डभेदः। (यथा माघे १२।१६।

"धूर्भङ्गविक्षेपविदारितोष्ट्रिका"।) उष्ट्रभार्य्या इति मेदिनी॥ वृश्चिकालीवृक्षः। इति राजनिर्घण्टः॥

उष्ट्री, स्त्री, (उष+ष्ट्रन्+ङीष्।) मृत्तिकाभाण्डः उष्ट्रस्त्री। इति हेमचन्द्रः॥ तस्याः क्षीरगुणाः कुष्ठशोथपित्तार्शःकफाटोपानाहोदरस्थजन्तुगुल्मश्वासोल्लासनाशित्वम्। तद्दधिगुणाः। अर्शःकुष्ठकृमिशूलोदररोगनाशित्वम्। कटुत्वम्। स्वादुत्वञ्च। तन्नवनीतगुणाः। विपाके शीतलत्वम् लघुत्वम्। व्रणकृमिकफास्रवातविषनाशित्वञ्च। तद्घृतगुणाः। मधुरत्वम्। विपाके कटुत्वम् शीतलत्वम्। कुष्ठकृमिविषवातकफगुल्मोदरनाशित्वञ्च। तन्मांसगुणाः॥ शिशिरत्वम्। त्रिदोषशमनत्वम्। लघुत्वम्। बलपुष्टिप्रदत्वम्। रुचिकारित्वम्। मधुरत्वम्। वीर्य्यवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (अस्या दुग्धगुणा यथा,—

"ईषद्रूक्षोष्णलवणमौष्ट्रकं दीपनं लघु।
शस्तं वातकफानाहकृमिशोथोदरार्शसाम्"॥

इति वैद्यकचक्रपाणिकृतद्रव्यगुणे पानीयवर्गे।

"औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनन्तथा।
क्रिमिकुष्ठकफानाहशोथोदरहरं सरम्"॥

इति भावप्रकाशस्य पूर्ब्बखण्डे द्वितीये भागे॥

"रूक्षं तथोष्णं लवणं कफस्य
निवारणं वातविकारहारि।
लघुप्रशस्तं कटुकं क्षमीणां
शोफार्शिनामौष्ट्रपयोऽनुकूलम्"॥

इति हारीते प्रथमस्थानेऽष्टमेऽध्याये॥

"रूक्षोष्णं क्षीरमुष्ट्रीणामीषत् सलवणं लघु।